# O. P. JINDAL SCHOOL,SAVITRI NAGAR

**Periodic Test-3 (Round – II) 2025– 2026**

**Class: VII** **M M: 20**

**Subject: Sanskrit** **Time: 1. Hr.**

Name: ______________________ Class / Section: ________ RollNo.:____________________

*General Instructions:- All questions are compulsory*

**प्र0 1 अधोलिखितं गद्यांशं पठित्वा तद् आधारितानाम् प्रश्नानाम् उत्तराणि लिखत–**

(निम्नलिखित गद्यांश को ध्यान से पढ़कर प्रश्नों के उत्तर संस्कृत भाषा में लिखिए)

पुरा एकस्मिन् वृक्षे एका चटका प्रतिवसति स्म। कालेन तस्याः सन्ततिः जाता। एकदा कश्चित् प्रमत्तः गजः तस्य वृक्षस्य अधः आगत्य तस्य शाखां शुण्डेन अत्रोटयत्। चटकायाः नीडं भुवी अपपत्। तेन अण्डानि विशीर्णानि। अथ सा चटका व्यलपत्। तस्याः विलापं श्रुत्वा काष्ठकूटः नाम खगः दुःखेन ताम् अपृच्छत्–''भद्रे, किमर्थं विलपसि ?'' इति।

चटकावदत्–''दुष्टेन एकेन गजेन मम सन्ततिः नाशिता। तस्य गजस्य वधेनैव मम दुःखम् अपसरेत्।'' ततः काष्ठकूटः तां वीणारवा– नाम्ना मक्षिकायाः समीपम् अनयत्। तयोः वार्तां श्रुत्वा मक्षिकावदत्–''ममापि मित्रं मण्डूकः मेघनादः अस्ति। शीघ्रं तमुपेत्य यथोचितं करिष्यामः।'' तदानीं तौ मक्षिकया सह गत्वा मेघनादस्य पुरः सर्वं वृतान्तं न्यवेदयताम्।

**I** **एकपदेन उत्तरत–** (केवलं प्रश्नद्वयम्) **(½x2=1)**

i वृक्षे का प्रतिवसति स्म ?

ii वृक्षस्य अधः कः आगतः ?

iii गजः केन शाखाम् अत्रोटयत् ?

**II** **पूर्णवाक्येन उत्तरत–** (केवलं प्रश्नद्वयम्) **(1x2=2)**

i चटका काष्टकूटं किम् अवदत् ?

ii मेघनादः मक्षिकां किम् अवदत् ?

iii चटकायाः विलापं श्रुत्वा काष्टकूटः तां किम् अपृच्छत् ?

**III** **यथानिर्देशम् उत्तरत–**(निर्देशानुसार उत्तर लिखिए) **(1x2=2)**

i 'अत्रोटयत्' इति क्रियायाः कर्तापदं किम् ?

(अ) शाखाम् (ब) गजः

(स) अधः (द) वृक्षस्य

ii 'प्रमत्तः गजः' अनयोः पदयोः विशेष्यपदम् किम् ?

(अ) गजः (ब) प्रमत्तः

(स) कश्चित् (द) कालेन

iii 'अकथयत्' इत्यर्थे गद्यांशे किम् पदं प्रयुक्तम् ?

(अ) अपृच्छत् (ब) न्यवेदयत्

(स) अनयत् (द) अवदत्

**प्र0 2 अधोलिखितम् वार्तालापम् मंजूषायां प्रदत्त उचितैः पदैः पूरयत–** **(1x5=5)**

(निम्नलिखित वार्तालाप को मंजूषा से उचित शब्द चुनकर पुनः लिखिए )

**अनुजा** – सुधे! अद्य किमर्थं शीघ्रं गच्छसि ?

**सुधा** – अद्य मम (1) ------ जन्मदिवसः अस्ति ?

**अनुजा** – ओह!

**सुधा** – त्वम् सायम् अवश्यम् एव मम गृहम् (2) -------।

**अनुजा** – अवश्यम् एव (3) -------।

**सुधा** – अहं (4) ------- प्रतीक्षां करिष्यामि।

**अनुजा** – परं कतिवादने कार्यक्रमः भविष्यति ?

**सुधा** – सायम् (5) ------- ।

**मञ्जूषा** –

| |
|---|
| आगमिष्यामि, पंचवादने, आगच्छ, भवतः, भ्रातुः |

**प्र0 3 अंकेन लिखितं समयं संस्कृतपदेन लिखित्वा रिक्तस्थानानि पूरयत–** **(1X4=4)**

(निम्नलिखित वाक्यों को उचित समयशब्द चुनकर पुनः लिखिए)

**i** गणेशः नित्यं (5:00) ------ वादने भ्रमणाय गच्छति।

**ii** सः प्रातः (6:30) ------ वादने विद्यालयं गच्छति।

**iii** माधवः (2:15) ------ वादने विद्यालयात् आगच्छति।

**iv** सः रात्रौ (10:45) ------ वादने स्वपिति।

**प्र0 4 निम्नलिखितानि रेखांकितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत–** **(½X6=3)**

( रेखांकित पदो के आधार पर **किन्हीं तीन** वाक्यों का प्रश्ननिर्माण कीजिए– )

**(क)** कालेन चटकायाः सन्ततिः जाता।

**(ख)** चटकायाः नीडं भुवि अपतत्।

**(ग)** गजस्य वधेनैव मम दुःखम् अपसरेत्।

**(घ)** काष्ठकूटः चंच्वा गजस्य नयने स्फोटयिष्यति।

**प्र0 5 कोष्ठकात् समुचितं उत्तरपदं चित्वा रिक्तस्थानानि पूरयत–** **(½X6=3)**

(कोष्ठक से उचित उत्तरपद चुनकर रिक्तस्थान पूरा कीजिए –)

**i)** ------ बालिका मधुरं गायति। (एकम् / एका / एकः)

**ii)** ------ कृषकाः कृषिकर्माणिकुर्वन्ति। (चत्वारः / चतस्रः / चत्वारि)

**iii)** ------ पत्राणि सुन्दराणि सन्ति। ( ते / ताः / तानि)

**iv)** धेनवः दुग्धं -------। (ददाति / ददति / ददन्ति)

**v)** ओ३म् ------- नमः। (सूर्यस्य / सूर्यम् / सूर्याय)

**vi)** वयं संस्कृतम् ------ । (अपठम् / अपठन् / अपठाम )

---000---